Acknowledgement

## ।। ऋणनिर्देशः ।।

वटोदरसंस्कृतमहाविद्यालयतो ज्योतिषशास्त्रविषये प्रथमवर्गे विशेषयोग्यतासहितमाचार्यपदवीप्राप्त्यनन्तरं संशोधनकार्य कर्तुं ममातीव दृढा मनीषा जाता। तदनुसारतः संशोधनविषयार्थं तथा च सुयोग्यमार्गदर्शकप्राप्तये प्रयत्नः प्रारब्धः। प्रो.डॉ. मुकुन्द वाडेकरमहोदयैः साकं मम परिचयः जातः। शास्त्रानेकावगाहनशीलानां तेषां सविधे संशोधनं कर्तुं मया विचारितम्। विषयचयने मार्गदर्शनं च कर्तुं मया तेऽभ्यर्थिताः। अन्तरं च क्रमशः कार्यं प्रगतिपथमारूढम्।

मम मार्गदर्शकैः प्रो. डॉ. मुकुन्द वाडेकरमहोदयैर्विषयचयने हस्तलिखितपठने-पाठनिर्धारणे-विषयप्रस्तुतीकरणे च निरन्तरं मार्गदर्शनं कृतम्। ततश्चेदं कार्यं पूर्णतां सफलतां च गतम्। सदा सर्वदा संशोधनमग्नैरनेककार्यव्यस्तैरपि सोत्साहमविश्रान्तं च सर्वप्रकारकं सुयोग्यं मार्गदर्शनं मह्यं कृतम्। तेषामहं हृदयेनोपकारभारान् स्मरामि।

प्राच्यविद्यामन्दिरस्थैः संशोधकैः कार्यकारिभिश्च मम संशोधनार्थमुपयुक्तानां पुस्तकानां हस्तलिखितानां च सरलतया संप्राप्तिः कारितः। विशेषतः डॉ. मीना पाठक, डॉ. शर्मिला बागची, डॉ. मिलिन्द जोशी, श्री. प्रफुल्ल सुर्वे -इत्यादीनां हार्दिकं धन्यवादज्ञापनं करोमि। विशेषतः प्राच्यविद्यामन्दिरं, वडोदरा- एतया संस्थया हस्तलिखितानां प्रतिकृतिप्रदानेन संशोधनकार्ये सहाय्यं कृतम्। तेषामहमाभारं निवेदयामि।

वटोदरसंस्कृतमहाविद्यालयस्य प्राचार्याः श्री. योगेश ओझा महोदयानां तथा च कलासंकायस्य प्रमुखानां प्रो. डॉ. नितिन व्यास महोदयानां संशोधनकार्ये सौविध्यकरणार्थं धन्यवादाः। येषां केषांचन प्रत्यक्षमप्रत्यक्षं सहाय्यं मया गृहीतं किन्तु विस्तारभयान्नोल्लेखः कृतस्तेषां सर्वेषामुपकारस्मरणं करोमि।

अन्ते च मम पतेः(चन्द्रशेखरस्य) उपकारभारं स्मरामि। येषामहं सदैवाधमर्णास्मि। यतो हि तेषां सदैव प्रोत्साहनं सहकार्यं च विना मम संशोधनकार्यं शक्यं नासीत्। मम पुत्र्योः गौरीभूमिकयोस्तथा च देवरपुत्रस्य हर्षलस्य चोपकारभारं स्मरामि। कर्तुमकर्तुमन्यथा कर्तुं

समर्थस्यागाधमहिम्नः परमेश्वरस्य केन वचसोपकारभारः स्मर्यते? तस्यैव कृपाप्रसादादिदं सर्वं सिद्धं भवति। तस्मै तु केवलं पुनः पुनर्नमस्कारः।

विश्वानि देव सवित–
दुरितानि पारसुव ।
यद्भद्रं तन्न आसुव।।

स्मिता चन्द्रशेखर कुलकर्णी

**तिथिः – अश्विनशुद्धसप्तमी**
दि. – ०३/१०/२०११